QP Code: CMN-01

# कर्नाटकसंस्कृतविश्वविद्यालयः

## सर्टिफिकेट्-परीक्षाः - २०२५

## हस्तप्रतिशास्त्रम्

### पत्रिका -१, विषयः - हस्तप्रतिशास्त्रस्य सामान्यपरिचयः (Introduction to Manuscriptology)

**Total No. of Questions: 49** **Total No. Of Printed Pages: 4**

**Date: 16.11.2025** **Time: 10.30 A.M to 1.00 P.M** **Max Marks: 80**

I. **अधोलिखितानां बहुविकल्पात्मकानां सर्वेषां प्रश्नानां समीचीनमुत्तरं चित्वा लिखन्तु ।**

Pick correct answers for the below given questions (attempt all) 40x1=40

१. हस्तप्रतिरित्यस्य कोऽर्थः?

अ) प्रकाशितग्रन्थः आ) हस्तेन लिखितः ग्रन्थः

इ) प्रकाशितलेखनम् ई) २०२४ वर्षे हस्तेन लिखितलेखनम्

२. पाण्डुलिपिशास्त्रस्य इदम् एकं नामान्तरम् अस्ति-

अ) हस्तप्रतिशास्त्रम् आ) भूखननशास्त्रम् इ) पुरातत्त्वशास्त्रम् ई) साहित्यशास्त्रम्

३. "लेखनम्" इति पदं केन धातुना निष्पन्नम्?

अ) लिह् आ) पठ् इ) लिख् ई) लिप्

४. "मातृका" शब्दस्य कः अर्थः?

अ) सूची आ) वर्णमालिका इ) प्रतिः ई) पुस्तकम्

५. उत्कीर्णमातृकायाः अपरं नाम किम्?

अ) हस्तप्रतिः आ) वर्णमालिका इ) शासनम् ई) मातृका

६. 'Manuscriptology' इति शब्दे 'manus' इत्यस्य अर्थः कः?

अ) मानवः आ) पादः इ) लेखनम् ई) हस्तः

७. 'Manuscriptology' इति शब्दे 'logos' इत्यस्य अर्थः कः?

अ) लाञ्छनम् आ) विज्ञानम् इ) पुस्तकम् ई) प्रतिः

८. "सरस्वतीमुखम्" इति पदस्य कोऽर्थः?

अ) पत्रम् आ) लेखनी इ) पुस्तकम् ई) लेखनम्

९. बि.ओ.आर्.ऐ. संस्थायाः संस्थापकस्य नाम किम्?

अ) रामकृष्णगोपालभण्डार्करः आ) जयचामराजेन्द्र ओडेयर् इ) आर्. शामाशास्त्री ई) वि.एस्. सूक्तङ्करः

१०. "भक्षाली" मातृका कस्यां लिप्यां लिखिता प्राप्ता?

अ) नन्दिनागरी आ) शारदायाः पूर्वरूपम् इ) ग्रन्थलिपिः ई) देवनागरी

११. कस्य अक्षराणि समशीर्षाणि भवेयुः?

अ) ग्रन्थपालकस्य आ) लेखकस्य इ) सम्पादकस्य ई) सङ्ग्राहकस्य

१२. अधो प्रदत्तेषु लक्षणेषु लेखकलक्षणात् भिन्नं चिनुत ।

अ) मेधावी आ) घनानि अक्षराणि इ) प्राज्ञः ई) दीर्घसूत्री

१३. "बवर्" मातृका कस्मिन् लिखिता प्राप्ता?

अ) भूर्जपत्रे आ) ताम्रपत्रे इ) तालपत्रे ई) स्वर्णपत्रे

१४. लोहलेखनसाधनस्य इदमेकम् उदाहरणम्-

अ) ताम्रपत्रम् आ) चर्म इ) तालपत्रम् ई) अगरुपत्रम्

१५. अगरुपत्रस्य अपरं नाम किम्?

अ) तालपत्रम् आ) साञ्चीपत् इ) भूर्जपत्रम् ई) कर्गजपत्रम्

१६. तालपत्रे लेखनार्थं उपयुक्तलेखनी किं नाम्ना ज्ञायते?

अ) अङ्कनी आ) कण्टः इ) लेखनी ई) मषी

१७. काश्मीरप्रान्ते आधिक्येन प्रयुक्तलेखनसाधनं किम्?

अ) तालपत्रम् आ) चर्म इ) अगरुपत्रम् ई) भूर्जपत्रम्

१८. मूलप्रतेः अपरं नाम किम्?

अ) आदर्शमातृका आ) पुत्रिकाप्रतिः इ) सोदरप्रतिः ई) सदस्यप्रतिः

१९. बि.ओ.आर्.ऐ. कुत्र वर्तते?

अ) बरोडा आ) पुणे इ) मैसूरु ई) बनारस्

२०. ओ.आर्.ऐ. मैसूरुतः प्रकाशितप्रसिद्धः ग्रन्थः कः?

अ) कौटिलीयार्थशास्त्रम् आ) भासनाटकचक्रम् इ) महाभारतम् ई) रामायणम्

२१. सङ्कीर्णं, स्थूलं, पीतवर्णयुतं कीदृशं पत्रं भवति?

अ) श्रीतालपत्रम् आ) खरतालपत्रम् इ) भूर्जपत्रम् ई) अगरुपत्रम्

२२. विशालं, कृशं, कपिशवर्णयुतं कीदृशं पत्रं भवति?

अ) साञ्चीपत् आ) खरतालम् इ) श्रीतालम् ई) भूर्जपत्रम्

२३. हस्तप्रतीनां लेखनात्पूर्वं ज्ञानस्य सञ्चरणं कथं प्रवर्तत?

अ) पुस्तकरूपेण आ) मुद्रणपरम्परया इ) शासनरूपेण ई) श्रुतिपरम्परया

२४. जि.ओ.एम्.एल्. कुत्र वर्तते?

अ) मैसूरु आ) चेन्नै इ) पुणे ई) केरल

२५. महाभारतस्य विमर्शात्मकसम्पादनं कस्मात् संशोधनालयात् कृत्वा प्रकाशितम्?

अ) जि.ओ.एम्.एल्. आ) ओ.आर्.ऐ. मैसूरु इ) बि.ओ.आर्.ऐ. ई) एशियाटिक् सोसैटि

२६. तञ्जावूरु सरस्वती महल् ग्रन्थालयस्य संस्थापकः कः?

अ) चामराजेन्द्र ओडेयर् आ) गोपालकृष्णः इ) सर्फोजी महाराजा ई) रामनाथः

२७. लेखनी एवमपि नाम्ना प्रसिद्धा आसीत् –

अ) पुस्तकम् आ) कर्गजम् इ) पत्रम् ई) अक्षरतूलिका

२८. तालपत्रे लिखितुम् उपयुक्तस्य लोहकण्टकस्य अपरं नाम किम्?

अ) लिप्यासनम् आ) शलाका इ) मशी ई) अक्षरभूमिका

२९. लेखनयोग्यताडपत्रस्य लक्षणं किम्?

अ) दृढं सौम्यं ऋजु साग्रं द्विधाकृतम् आ) कर्कशम्

इ) हीनाग्रम् ई) वक्रम्

३०. "तैलाद्रक्षेत् जलाद्रक्षेत् रक्षेत् शिथिलबन्धनात्" इति किं सम्बद्धश्लोकः?

अ) सम्पादनम् आ) संरक्षणम् इ) वाचनम् ई) सङ्कलनम्

३१. कथं हस्तप्रतिः सम्भूषणीया?

अ) सुक्षेत्रवत् आ) व्रणिताङ्गवत् इ) सदपत्यवत् ई) सन्मित्रवत्

३२. प्रस्तुतं सङ्गणकयुगे हस्तप्रतयः केन रूपेण संरक्ष्यमाणाः सन्ति?

अ) डिजिटलैसेशन् आ) मैक्रोफिल्म् इ) सि.डि. ई) मैक्रोफिश्

३३. हस्तप्रतीनां डिजिटलैसेशन् इत्यस्य आनुकूल्यं किम्?

अ) अल्पस्थलम् आ) अल्पव्ययः इ) सङ्ग्रहसौलभ्यम् ई) एतत्सर्वम्

३४. भारते कर्गजपत्राणामुपयोगात्पूर्वं कस्योपयोगः आधिक्येन क्रियते स्म?

अ) तालपत्रम् आ) स्वर्णपत्रम् इ) रजतपत्रम् ई) शिला

३५. कुम्भीपत्रस्य प्रयोगः आधिक्येन कस्मिन् प्रान्ते क्रियते स्म?

अ) ओडिस्सा आ) गुजरात् इ) अस्साम् ई) काश्मीर्

३६. कौटिलीयार्थशास्त्रस्य आद्यसम्पादकः कः?

अ) टि. गणपतिशास्त्रि आ) वि.एस्. सूक्तङ्कर् इ) आर्. शामाशास्त्री ई) कुप्पुस्वामीशास्त्री

३७. "विश्वं गणयतो विधातुः शशिकाठिनीखण्डेन तमो **मषीश्यामेऽजिन** इव वियति" इति अजिनप्रयोगः कस्मिन् पठ्ये लभ्यते?

अ) रघुवंशे आ) कादम्बर्याम् इ) वासवदत्ते ई) विष्णुपुराणे

३८. "कष्टेन लिखितं शास्त्रं यत्नेन परिपालयेत्" इति लेखकस्य उक्तिः किमिति ज्ञायते?

अ) संरक्षणम् आ) परिविक्षणम् इ) कर्तव्यम् ई) निवेदना

३९. पार्श्वद्वयेऽपि काष्ठपट्टिकया बद्धा संरक्षिता हस्तप्रतिः किं नाम्ना ज्ञायते?

अ) गण्डी आ) सम्पुटफलकम् इ) कच्छपी ई) एकपाठः

४०. सरस्वतीमहल् ग्रन्थालयः कस्मिन् राज्ये वर्तते?

अ) तमिळुनाडु आ) कर्नाटके इ) गुजरात् ई) महाराष्ट्रे

II. **अधोलिखितेषु प्रश्नेषु चतुर्णां लघुनिबन्धात्मकम् उत्तरं लिखत –**

Answer the following questions with a short notes (any four) 4x5=20

१. हस्तप्रतेः-शासनस्य च मध्ये को भेदः?

२. लेखकलक्षणं लिखत।

३. लेखकस्य कर्तव्यं, प्रार्थनां च लिखत।

४. हस्तप्रतेः विधानि कानि? विवृणुत।

५. संस्कृतसाहित्ये हस्तप्रतीनां महत्त्वम् ।

६. हस्तप्रति इति पदस्य नामान्तराणि विलिख्य विवृणुत ।

III. **अधोलिखितेषु द्वयोः प्रश्नयोः उत्तरं निबन्धरूपेण लिखत ।**

Answer the following questions in an essay form (any two) 2x10=20

१. हस्तप्रतिसंरक्षणविषये लिखत ।

२. भारते विद्यमानेषु हस्तप्रतिसङ्ग्रहालयेषु प्रधानचतुर्णां सङ्ग्रहालयानां विषये लिखत ।

३. हस्तप्रतिलेखने उपयुज्यमानसाधनानि यथामति निरूपणीयानि ।

* * * * *